# .. shyAmalAnavaratnamAlikAstotram ..

## ॥ श्यामलानवरत्नमालिकास्तोत्रम् ॥

ओङ्कारपंजरशुकीमुपनिषदुद्यानकेलिकलकण्ठीम् ।
आगमविपिनमयूरीमार्यामन्तर्विभावये गौरीम् ॥ १॥
दयमानदीर्घनयनां देशकरूपेण दर्शिताभ्युदयाम् ।
वामकुचनिहितवीणां वरदां संगीतमातृकां वन्दे ॥ २॥
श्यामतनुसौकुमार्यां सौन्दर्यानन्द सम्पदुन्मेषाम् ।
तरुणिमकरुणापूरां मदजलकल्लोललोचनां वन्दे ॥ ३॥
नखमुखमुखरितवीणानादरसास्वादनवनवोल्लासम् ।
मुखमम्ब मोदयतु मां मुक्ताताटंकमुग्धहसितं ते ॥ ४॥
सरिगमपधनिरतां तां वीणासंक्रांतकांतहस्तां ताम् ।
शांतां मृदुलस्वांतां कुचभरतान्तां नमामि शिवकांताम् ॥ ५॥
अवटुतटघटितचूलीताडिततालीपलाशताटंकाम् ।
वीणावादनवेलाऽकम्पितशिरसां नमामि मातङ्गीम् ॥ ६॥
वीणारवानुषङ्गं विकचमुखाम्बोजमाधुरीभृन्ङ्गीम् ।
करुणापूरतरङ्गं कलये मातङ्गकन्यकापांगम् ॥ ७॥
मणिभङ्गमेचकाङ्गीं मातङ्गीं नौमि सिद्धमातङ्गीम् ।
यौवनवनसारङ्गीं सङ्गीताम्भोरुहानुभव भृङ्गीम् ॥ ८॥
मेचकमासेचनकं मिथ्यादृष्टान्तमध्यभागं ते ।
मातस्तव स्वरूपं मंगलसंगीतसौरभं मन्ये ॥ ९॥
॥ इति श्यामलानवरत्नमालिकास्तोत्रं संपूर्णम् ॥

Encoded and proofread by Kapila Sankaran

Please send corrections to sanskrit@cheerful.com
Last updated May 17, 2008